श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ घोषशान्तिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

## श्री रङ्गरामानुज महादेशिकन्

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ घोषशान्तिः ॥

शं नो॒ वात॑ः पवतां मात॒रिश्वा॒
शं न॑स्तपतु॒ सूर्य॑ः।
अहा॑नि॒ शं भ॑वन्तु न॒श्शग्
रात्रि॒ः प्रति॑ धीयताम्।
शमु॒षा नो॒ व्यु॑च्छतु॒
शमा॑दि॒त्य उदे॑तु नः।
शि॒वा न॒श्शन्त॑मा भव
सुमृडी॒का सर॑स्वति।
मा ते॒ व्यो॑म स॒ंदृशि॑।
इडा॑यै॒ वास्त्व॑सि वास्तु॒मद्वा᳚स्तु॒मन्तो॑
भूयास्म॒ मावास्तो᳚श्छिथ्स्मह्यवा॒स्तुस्स
भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
प्र॒ति॒ष्ठाऽसि॑ प्रति॒ष्ठाव॑न्तो भूयास्म॒ मा
प्र॑ति॒ष्ठाया᳚श्छिथ्स्मह्यप्रति॒ष्ठस्स
भू॑या॒द्यो᳚ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आ वा॑त वाहि भेष॒जं वि वा॑तवाहि॒ यद्रप॑ः।
त्वग् हि वि॒श्वभे॑षजो दे॒वाना᳚ं दूत ईय॑से।

द्वाविमौ वातौ वात आसिन्धोरापरावतः।
दक्षं मे अन्य आवातु पराऽन्यो वातु यद्रपः।
यददो वात ते गृहेऽमृतस्य निधिर् हितः।
ततो नो देहि जीवसे ततो नो धेहि भेषजम्।
ततो नो मह आवह वात आवातु भेषजम्।
शम्भूर्मयोभूर्नो हृदे प्रण आयूंषि तारिषत्।
इन्द्रस्य गृहोऽसि तं त्वा प्रपद्ये सगुस्साश्वः।
सह यन्मे अस्ति तेन।
भूः प्रपद्ये भुवः प्रपद्ये सुवः प्रपद्ये
भूर्भुवस्सुवः प्रपद्ये वायुं
प्रपद्येऽनार्तां देवतां
प्रपद्येऽश्मानमाखणं
प्रपद्ये प्रजापतेर्ब्रह्मकोशं
ब्रह्मप्रपद्य ओं प्रपद्ये।
अन्तरिक्षं म उर्वन्तरं बृहदग्नयः
पर्वताश्च यया वातः स्वस्त्या
स्वस्तिमान्तयाँ स्वस्त्या
स्वस्तिमानसानि।
प्राणापानौ मृत्योर्मा पातं
प्राणापानौ मा मा हासिष्टं
मयि मेधां मयि प्रजां

मय्य॒ग्निस्तेजो॑ दधातु॒
मयि॑ मे॒धां मयि॑ प्र॒जां
मयीन्द्र॑ इन्द्रि॒यं द॑धातु॒
मयि॑ मे॒धां मयि॑ प्र॒जां
मयि॒ सूर्यो॒ भ्राजो॑ दधातु।
द्युभि॑र॒क्तुभि॒ः परि॑पातम॒स्मानरि॑ष्टेभिरश्विना॒
सौभ॑गेभिः।
तन्नो॑ मि॒त्रो वरु॑णो मामहन्ता॒मदि॑ति॒ः
सिन्धु॑ः पृथि॒वी उ॒त द्यौः।
कया॑ नश्चि॒त्र आ भु॑वदू॒ती स॒दावृ॑ध॒स्सखा॑।
कया॒ शचि॑ष्ठयाऽऽवृ॒ता।
कस्त्वा॑ स॒त्यो मदा॑ना॒
मग्ंहि॑ष्ठो मथ्स॒दन्ध॑सः।
दृ॒ढा चि॑दा॒रुजे॒ वसु॑।
अ॒भीषुण॒स्सखी॑नामवि॒ता ज॑रितॄ॒णाम्।
श॒तं भ॑वास्यू॒तिभि॑ः।
वय॑स्सुप॒र्णा उप॑सेदु॒रिन्द्र॑
प्रि॒यमे॑धा॒ ऋष॑यो॒ नाध॑मानाः।
अप॑ध्वा॒न्तमू॑र्णु॒हि पू॒र्धि
चक्षु॑र्मुमु॒ग्ध्य॑स्मान्नि॒धये॑ऽवब॒द्धान्।
शं नो॑ दे॒वीर॒भिष्ट॑य॒ आपो॑ भवन्तु पी॒तये॑।

शं योर॒भिस्र॑वन्तु नः।
ईशा॑ना॒ वार्या॑णां॒ क्षय॑न्तीश्चर्षणी॒नाम्।
अ॒पो या॑चामि भेष॒जम्।
सु॒मि॒त्रा न॒ आप॒ ओष॑धयः सन्तु दु॒र्मि॒त्रास्तस्मै॑
भूयासु॒र्यो॑ऽस्मान्द्वेष्टि॒ यं च॑ व॒यं द्वि॒ष्मः।
आपो॒ हिष्ठा म॑यो॒भुव॒स्ता न॑ ऊ॒र्जे द॑धातन।
म॒हेरणा॑य॒ चक्ष॑से।
यो वः॑ शि॒वत॑मो॒ रस॒स्तस्य॑ भजयते॒ ह नः॑।
उ॒श॒तीरि॑व मा॒तरः॑।
तस्मा॒ अर॑ङ्गमाम वो॒ यस्य॒ क्षया॑य॒ जिन्व॑थ।
आपो॑ ज॒नय॑था च नः।
पृ॒थि॒वी शा॒न्ता साऽग्निना॑ शा॒न्ता
सा मे॑ शा॒न्ता शुच॑ग्ं शमयतु।
अ॒न्तरि॑क्षग्ं शा॒न्तं तद्वा॒युना॑ शा॒न्तं
तन्मे॑ शा॒न्तग्ं शुच॑ग्ं शमयतु।
द्यौश्शा॒न्ता साऽऽदि॒त्येन॑ शा॒न्ता
सा मे॑ शा॒न्ता शुच॑ग्ं शमयतु।
पृ॒थि॒वी शान्ति॑र॒न्तरि॑क्ष॒ग्ं॒
शान्ति॒र्द्यौश्शान्ति॒र्दिश॒श्शान्ति॑
रवान्तरदि॒शाश्शान्ति॑
र॒ग्निश्शान्ति॑र्वा॒युश्शान्ति॑

राद॒ित्यश्शान्ति॑श्च॒न्द्रमा॒

श्शान्ति॒र्नक्ष॑त्राणि॒ शान्ति॒

राप॒श्शान्ति॒रोष॑धय॒श्शान्ति॒र्वन॒स्पत॑य॒

श्शान्ति॒र्गौश्शान्ति॑र॒जा शान्ति॒रश्व॒श्शान्तिः॒

पुरु॑ष॒श्शान्ति॒र्ब्रह्म॒श्शान्ति॑र्ब्राह्म॒ण

श्शान्ति॒श्शान्ति॑रे॒व

शान्ति॒श्शान्ति॑र्मे अस्तु॒ शान्तिः॑।

तया॒हग्ं॒ शा॒न्त्या स॑र्वशा॒न्त्या

मह्यं॑ द्वि॒पदे॒ चतु॑ष्पदे च॒

शान्तिं॑ करोमि॒ शान्ति॑र्मे अस्तु॒ शान्तिः॑।

एह॒ श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा

प्र॑ति॒ष्ठा श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॒

मोत्ति॑ष्ठन्त॒मनूत्ति॑ष्ठन्तु॒ मा मा॒ग्॒

श्रीश्च॒ ह्रीश्च॒ धृति॑श्च॒ तपो॑ मे॒धा प्र॑ति॒ष्ठा

श्र॒द्धा स॒त्यं धर्म॑श्चै॒तानि॑ मा॒ मा हा॑सिषुः।

उदायु॑षा स्वा॒युषोदोष॑धीना॒ग्ं॒

रसे॒नोत्प॒र्जन्य॑स्य॒

शुष्मे॒णोद॑स्थाम॒मृता॒ग्ं॒ अनु॑।

तच्चक्षु॑र्दे॒वहि॑तं पु॒रस्ता॓च्छु॒क्रमु॒च्चर॑त्।

पश्ये॑म श॒रद॑श्श॒तं जीवे॑म श॒रद॑श्श॒तं

नन्दा॑म श॒रद॑श्श॒तं मोदा॑म श॒रद॑श्श॒तं

भवा॑म श॒रद॑श्श॒तग्ं शृ॒णवा॑म श॒रद॑श्श॒तं
प्रब्र॑वाम श॒रद॑श्श॒तमजी॑तास्स्याम
श॒रद॑श्श॒तं ज्योक्च॒ सूर्यं॑ दृ॒शे।
य उद॑गान्मह॒तोऽर्णवा᳚द्वि॒भ्राज॑मानस्सरि॒रस्य॒
मध्या॒थ्समा॑ वृष॒भो लो॑हिता॒क्षस्सूर्यो॑
विप॒श्चिन्मन॑सा पुनातु।
ब्रह्म॑ण॒श्चोत॑न्यसि॒ ब्रह्म॑ण आ॒णीस्थो॒
ब्रह्म॑ण आ॒वप॑नमसि धारि॒तेयं पृ॑थि॒वी
ब्रह्म॑णा म॒ही धा॑रि॒तमे॑नेन म॒हद॒न्तरि॑क्षं॒
दिवं॑ दाधार पृथि॒वीग्ं सदे॑वां॒ यद॒हं वेद॒
तद॒हं धा॑रयाणि॒ मा मद्वेदोऽधि॒ विस्रं॑सत्।
मे॒धा॒म॒नी॒षे माऽऽवि॑शताग्ं स॒मीची॑
भू॒तस्य॒ भव्य॒स्याव॑रुद्ध्यै॒
सर्व॒मायु॑रयाणि॒ सर्व॒मायु॑रयाणि।
आ॒भिर्गी॒र्भिर्यदतो॑ न ऊ॒नमाप्या॑यय
हरिवो॒ वर्ध॑मानः।
य॒दा स्तो॒तृभ्यो॒ महि॑ गो॒त्रारु॒जासि॑
भूयिष्ठ॒भाजो॒ अध॑ ते स्याम।
ब्रह्म॒ प्रावा॑दिष्म॒ तन्नो॒ मा हा॑सीत्।
ओं शान्ति॒श्शान्ति॒श्शान्तिः॑॥

**॥ इति घोषशान्तिः समाप्तः॥**